**CLASS : 12th (Sr. Secondary)** | **Code No. 2005**

**Series : SS-M/2017**

*रोल नं०* | | | | | | | | | | |

***SET : B***

# संस्कृत

## SANSKRIT

### *ACADEMIC/OPEN*

(Only for Fresh Candidates)

***(Evening Session)***

*समय : **3** घण्टे ]* | *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः*** –

*(i)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii)* *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

## (अपठित-अवबोधनम्)

**1.** अधोलिखितगद्यांशं पठित्वा निम्नांकितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखेयुः –

नदी पर्वतेभ्यः निर्गत्य क्षेत्रेषु आगच्छति। प्रपातः तस्याः प्रथमावस्था अस्ति। शनैः शनैः सा सागरं प्रति गच्छति। तस्याः बालुकायुक्ततटेषु हरिताः तरवः भवन्ति। तेषां वृक्षाणामुपरि काकाः, चटकाः, शुकाः कोकिलाः च वसन्ति। पक्षिणां कलरवैः, बालकानां क्रीडाभिः, स्त्रीणां वार्तालापैः तस्याः तटाः गुञ्जायमानाः भवन्ति परं केचन जनाः अत्रागत्य मनोरञ्जनं कुर्वन्ति, खादन्ति, भोजनस्य अवशिष्टं च तस्याः जले एव पातयन्ति। एवं तस्याः जलं दूषितं भवति। दूषितं जलं स्वास्थ्याय अहितकरम् अस्ति। अतः जलं दूषितं न कर्तव्यम् यतः जलम् एव प्राणिनां जीवनम् अस्ति।

***प्रश्नाः*** $5 \times 2 = 10$

(क) नद्याः प्रथमावस्था का ?

(ख) नदी केभ्यः निर्गत्य क्षेत्रेषु आगच्छति ?

(ग) कीदृशं जलं स्वास्थ्याय अहितकरम् ?

(घ) नद्याः तटाः कथं गुञ्जायमानाः भवन्ति ?

(ङ) जलं केषां जीवनम् ?

### खण्डः 'ख'

## (रचनात्मक–कार्यम्)

**2.** विषयमेकमधिकृत्य लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) मम प्रियः कविः,

(ख) प्रातःकालीन भ्रमणम्,

(ग) संस्कृतभाषायाः महत्त्वम्।

### खण्डः 'ग'

## (पठित–अवबोधनम्)

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तदतिकुटिलचेष्टादारुणे राज्यतन्त्रे अस्मिन् महामोहकारिणि च यौवने कुमार ! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः।

**अथवा**

(ख) स स्वल्पभाषी, अतस्तस्य मनः कथा मनोव्यथा वा बोधगम्या नास्ति। सन्तुलितो वार्त्तालापः, साक्षात्समये आगमनम्, ततः सञ्चिकासु मनोनिवेशः, कार्यं समाप्य स्वगृहं प्रत्यागमनञ्च तस्य वैशिष्ट्यमासीत्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।

**अथवा**

(ख) केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्तु खलु भूषणानि सततं वाग्भूषणं भूषणम्।

**5.** अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) न कर्म लिप्यते नरे।

(ख) सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः।

(ग) मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतया सृष्टिः।

(घ) उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

इत्येवं विचार्य सर्वस्वदक्षिणं यज्ञं कर्त्तुमुपक्रान्तवान्। ततः शिल्पिभिरतीव मनोहरो मण्डपः कारितः। सर्वापि यज्ञसामग्री समहृता। देवमुनिगन्धर्वयक्षसिद्धादयश्च समाहूताः।

*प्रश्नाः* $2 \times 1 = 2$

(क) यज्ञे के के समाहूताः ?

(ख) सर्वा इति पदे कः शब्दः का विभक्तिश्च ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिस्ये।

स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि।।

*प्रश्नाः* 2 × 1 = 2

(क) चातकोऽपि कं न याचते ?

(ख) 'अहम्' इति पदे का विभक्तिः किं वचनञ्च ?

**8.** रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत - 2 × 1 = 2

(क) <u>स्वर्गभूमिं</u> कुर्शीति वदन्ति।

(ख) असौ शिववीरचरः <u>निजकार्यात्</u> न विरमति।

**खण्डः 'घ'**

**(संस्कृत-साहित्य–परिचयः)**

**9.** पं० भट्ट मथुरानाथ शास्त्रिणः **अथवा** पं० अम्बिकादत्तव्यासस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः - 4

(i) रघुवंशम्,

(ii) ईशावास्योपनिषद्।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्रद्वयोः संस्कृतभाषया लक्षणोदाहरणौ लिखत — 2 × 4 = 8

(i) इन्द्रवज्रा,

(ii) मालिनी,

(iii) शार्दूलविक्रीडितम्।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(i) उपमा,

(ii) रूपकः,

(iii) व्याजस्तुतिः।

**खण्डः 'च'**

## (अनुप्रयुक्त-व्याकरणम्)

**13.** (क) दीर्घसन्धेः **अथवा** अयादिसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) कर्मकारकस्य **अथवा** अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) तत्पुरुषस्य **अथवा** द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

### खण्डः 'छ'

### [ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]

**14.** अधस्तनप्रश्नानां लिखित्तोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'जहातीह' इति पदे कः सन्धिविच्छेदः ?

(i) जहाती + ह (ii) जहाति + इह
(iii) जहाति + ईह (iv) जहाती + ईह

(ख) 'तेन + एव' इति पदे किं सन्धिपदम् ?

(i) तेनेव (ii) तेनिव
(iii) तेनैव (iv) तेनव

(ग) 'यथेच्छम्' इति पदे का सन्धिः ?

(i) गुणसन्धिः (ii) दीर्घसन्धिः
(iii) यण्सन्धिः (iv) अयादिसन्धिः

(घ) 'अश्रुधारा' इति पदे विग्रहोऽस्ति –

(i) अश्रुः धारा (ii) अश्रूणां धारा
(iii) अश्रवः धारा (iv) अश्रूः धाराः

(ङ) 'प्रकृत्या सिद्धम्' इति विग्रहे किं समस्तपदम् ?

(i) प्रकृतीसिद्धम् (ii) प्रकृत्यासिद्धम्
(iii) प्रकृतिसिद्धम् (iv) प्रकृत्सिद्धम्

(च) 'कुलव्रतम्' अत्र कः समासः ?

(i) कर्मधारयः (ii) तत्पुरुषः
(iii) अव्ययीभावः (iv) बहुव्रीहिः

(छ) सर्व, पुल्लिंग, द्वितीया, बहुवचने रूपम् –

(i) सर्वान् (ii) सर्वेभ्यः

(iii) सर्वे (iv) सर्वेण

(ज) 'राज्ञे' इति पदे का विभक्तिः ?

(i) पञ्चमी (ii) तृतीया

(iii) प्रथमा (iv) चतुर्थी

(झ) 'गृह्यताम्' इति पदे कः धातुः ?

(i) ग्रह् (ii) गृह्य

(iii) गृह् (iv) ग्रह्य

(ञ) 'आध्नन्ति' इति पदे कः पुरुषः ?

(i) प्रथमपुरुषः (ii) उत्तमपुरुषः

(iii) अन्यपुरुषः (iv) मध्यमपुरुषः

(ट) 'दोधूयमानाः' इति पदे कः प्रत्ययः ?

(i) मान् (ii) आन्

(iii) शानच् (iv) शतृ

(ठ) 'आ + गम् + ल्यप्' एषां संयोगे किं रूपम् ?

(i) आगमय (ii) आगत्य

(iii) आगतः (iv) आगमः

(ढ) 'दा' इति उपपदयोगे का विभक्तिः ?

(i) प्रथमा (ii) द्वितीया

(iii) चतुर्थी (iv) तृतीया

(ड) 'स्वर्गः' इति पदस्य समानार्थपदमस्ति –

(i) नरकः (ii) नाकः

(iii) कलुषम् (iv) पातकम्

(ण) 'सन्तुलितः' इति पदस्य विशेष्यम् –

(i) व्यवहारः (ii) पत्रम्

(iii) जन्तवः (iv) शिशवः

(त) 'भयम्' इति पदस्य विलोमपदस्ति –

(i) सभयम् (ii) निर्भयम्

(iii) भयभीतः (iv) आभयम्